# Shri Nimbarka Ashtottarashatanama Stotram

# श्रीनिम्बार्काष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Nimbarka Ashtottarashata Nama Stotram

File name : nimbArkAShTottarashatanAmastotram.itx

Category : deities_misc, gurudev, nimbArkAchArya, aShTottarashatanAma

Location : doc_deities_misc

Author : sadAnandabhaTTa

Proofread by : Chandrasekhar Karumuri

Description/comments : See corresponding nAmAvalI.

Acknowledge-Permission: Jagadguru Nimbarkacharyapitham, Shrinimbarkatirtha, Kishangadh, Ajmer, Rajasthan

Latest update : January 23, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2023

*sanskritdocuments.org*

# श्रीनिम्बार्काष्टोत्तरशतनामस्तोत्रम्

श्रीसदानन्दभट्टप्रणीतं -
नमस्कृत्य प्रवक्ष्यामि श्रीमदाचार्यसद्गुरुम् ।
तन्नाम्नामष्टोत्तरशतं कृष्णभक्तिविवर्द्धनम् ॥ १॥

ॐ आनन्दः परमानन्दः सूत्रभाष्य-प्रकाशकः ।
जीवोद्धारप्रयत्नात्मा स्मृतमात्रार्त्तिनाशनः ॥ २॥

श्री भगावत-गुप्तार्थ-प्रबोधन-परायणः ।
साकारब्रह्मवादी च व्यापको ब्रह्मपारगः ॥ ३॥

माया-ध्वान्त-निराकर्त्ता व्यर्थवाद-निरासकृत् ।
भक्ति-पङ्कज-मार्त्तण्डो निम्बवृक्षविभाकरः ॥ ४॥

सर्वाचार्यप्रियः कृष्ण-बल्लवी-प्रिय-मानदः ।
लक्ष्मीकान्तो द्विजश्रेष्ठो महाकारुणिकः प्रभुः ॥ ५॥

अनन्तदानदक्षश्च महादेव-चरित्रवान् ।
आगमानुकृति-ब्याज-मोहितासुरमानुषः ॥ ६॥

आनन्दपूर्णाब्धिदेहो वैष्णवो हितकृत्सताम् ।
व्रजभोगार्थ-सद्रूप-भक्तिकृत् परमेश्वरः ॥ ७॥

सर्ववैष्णवसम्पन्नः श्रीविष्णुज्ञानदो मुनिः ।
स्वानन्द-चिक्कणः पद्म-दलायत-विलोचनः ॥ ८॥

कृपा-पीयूष-सञ्जुष्ट-वेद-पद्म-प्रभाकरः ।
रोष दृष्ट्या च सन्दग्ध-भक्त-शत्रुः स्वसेवितः ॥ ९॥

सुखपूर्णः सुखाराध्यः शीतलाङ्घ्रिसरोरुहः ।
भक्तप्रतापो भक्तादिर्भक्त-काम-प्रपूरितः ॥ १०॥

श्रीभागवत-तात्पर्य्य-समुद्र-मथने क्षमः ।

वेदान्त-सारवाक् सिन्धु-तर्पिताखिलसेवकः ॥ ११॥

सामीप्य-भक्त-दत्तश्रीकृष्णप्रेमाऽखिलेष्टदः ।
कृष्णक्रीडारतो नित्यं दययैतत्कथाप्रदः ॥ १२॥

कमलाधवभक्त्यर्थ-सर्वनामोपदेशकः ।
कर्माचारोपदेष्टा च भक्ति-मार्ग-प्रवर्त्तकः ॥ १३॥

विश्वेन्द्रो धर्मकर्त्ता च धर्मकालो द्विजेश्वरः ।
सर्वानन्दः सर्वकामः कालभानुर्मुनीश्वरः ॥ १४॥

गोपिकायशविस्तारवक्ता तत्परसाधनः ।
जीवाचारोपदेशार्थ-भक्ति-ग्रन्थ-निरूपकः ॥ १५॥

शान्तो जितारिषड्वर्गो यशोदा-प्रियचेष्टितः ।
स्वशिष्यार्थ-कृताभ्यासः सर्वविद्या-विशारदः ॥ १६॥

हरि-भक्ति-स्वभावो हि कृपा-सागरयत्नवान् ।
व्रजे संस्थापितप्राणो व्रजपालो व्रजाधिपः ॥ १७॥

दयालुर्भेदभर्त्ता च भेदवादे सहायवान् ।
तमालश्यामलाङ्गो हि सिंहग्रीवो महाभुजः ॥ १८॥

उपासनादिकर्त्ता च मुग्ध-मोह-विनाशकः ।
वाजपेय-सोमयज्ञ-चातुर्मास्यानुभूतिकृत् ॥ १९॥

बकारिपद-सेवोपदेष्टा श्रीगोपिका-प्रियः ।
सुलक्षण-निकुञ्जस्थो गोपीश-रस-पूरितः ॥ २०॥

भक्त-गम्यो हितप्रियो विस्मृतान्यो जनार्दनः ।
जनार्दनस्थितिः शुद्धलीलाकर्त्ता गतस्मयः ॥ २१॥

गोपीनाथप्रियो गोपीज्ञानदाता विमोहनः ।
रामेषुप्राणाक्षरोक्त्या सद्यः पतित-पावनः ॥ २२॥

हरिभक्त्योक्तसुहृदः स्वदयाम्बुजविष्टरः ।
गदी पद्मी सुयज्ञज्ञो दैत्यशत्रु-विमुक्तिदः ॥ २३॥

लीलामृत-रसास्वाद-कृपा-जनशरीरभृत् ।
गोवर्द्धन-कृतोत्साहस्तल्लीलाप्रेममन्दिरः ॥ २४॥

मोक्षकर्त्ता मोक्षभोक्ता चतुर्वेद-विशारदः ।
सत्यस्वभावस्त्रिगुणातीतः सुनय-कोविदः ॥ २५॥

स्वकीर्त्तिगीताभाष्येन्दुर्वेदभाष्य-प्रदर्शकः ।
मायावादाख्यतूलाग्निः कृष्णवाक्य-निरूपकः ॥ २६॥

अनन्त-भक्त-संराध्य-चरणाम्बुज-कोशभूः ।
इत्यानन्दविभोः प्रोक्तं नाम्नामष्टोत्तरं शतम् ॥ २७॥

श्रद्धाविदोषबुद्धियो जपत्यनुदिनं बुधम् ।
चरणैकमनाः शुद्धमुक्तिं प्राप्नोत्यसंशयः ॥ २८॥

यो जपेत्प्रातरुत्थाय निम्बार्कस्य महात्मनः ।
श्रद्धया पूरितः प्रोक्तं भक्तिविघ्नविनाशनम् ॥ २९॥

प्रेमभक्तिर्भवेत्तस्य केशवे नात्र संशयः ।
अपारकष्टयुक्तोऽपि मुच्यते कष्टसकटात् ॥ ३०॥

सदानन्देन भट्टेन विष्णु-भक्ति-यशोऽर्थिना ।
प्रियावल्लभदासेन कृतं निम्बार्क-संस्तवम् ॥ ३१॥

स्वान्तान्धकारहन्तारं कर्त्तारं शुभकर्मणाम् ।
अभीष्ट-फलदातारं श्रीनिम्बार्कमहं भजे ॥ ३२॥

॥ इति श्रीसदानन्दभट्टप्रणीतं
श्रीनिम्बार्काष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥

Proofread by Chandrasekhar Karumuri

*Shri Nimbarka Ashtottarashatanama Stotram*

pdf was typeset on January 23, 2023

Please send corrections to *sanskrit@cheerful.com*